# षोडशायुध स्तोत्रम्

श्रीमान् वेङ्कट नाथार्यः कवितार्किक केसरी ।
वेदान्ता चार्य वर्योमे सन्निधत्तां सदाहृदि ॥

स्व सङ्कल्प कला कल्पैर् आयुधैर् आयुधेश्वरः ।
जुष्टः षोडशभिर् दिव्यैर् जुषतां वः परः पुमान् ॥१

यदायत्तं जगच्चक्रं काल चक्रं च शाश्वतम् ।
पातु वस्तत्परं चक्रं चक्र रूपस्य चक्रिणः ॥२

यत्प्रसूति शतैरासन् रुद्राः परशु लाञ्छिताः ।
स दिव्यो हेति राजस्य परशुः परिपातु वः ॥३

हेलया हेति राजेन यस्मिन् दैत्याः समुद्धृते ।
सकुन्ता इव धावन्ति स कुन्तः पालयेत वः ॥४

दैत्य दानव मुख्यानां दण्ड्यानां येन दण्डनम् ।
हेति दण्डेश दण्डोऽसौ भवतां दण्डयेद् द्विषः ॥५

अनन्यान्वय भक्तानां रुन्धन्नाशा मतङ्गजान् ।
अनङ्कुश विहारो वः पातु हेतीश्वराङ्कुशः ॥६

संभूय शलभायन्ते यत्र पापानि देहिनाम्।
स पातु शत वक्राग्नि हेतिर्हेतीश्वरस्य वः ॥७

अविध्यां स्व प्रकाशेन विध्यारूपश्छिनत्ति यः।
स सुदर्शन निस्त्रिंशः सौतु वस्तत्व दर्शनम् ॥८

क्रिया शक्ति गुणो विष्णोः यो भवत्यति शक्तिमान्।
अकुण्ठ शक्ति सा शक्तिर् अशक्तिं वारयेत वः ॥९

तारत्वं यस्य संस्थाने शब्दे च परिदृश्यते।
प्रभोः प्रहरणेन्द्रस्य पाञ्चजन्यः स पातु वः ॥१०

यं सात्विकम् अहङ्कारम् आमनन्त्यक्ष सायकम्।
अव्याद् वश्चक्र रूपस्य तद्धनुः शार्ङ्गः धन्वनः ॥११

आयुधेन्द्रेण येनैव विश्वसर्गो विरिच्यते।
स वः सौदर्शनः कुर्यात् पाशः पाशः विमोचनम् ॥१२

विहारो येन देवस्य विश्व क्षेत्र कृषीवलः
व्यज्यते तेन सीरेण नासीर विजयोस्तु वः ॥१३

आयुधानां अहं वज्रं इत्य गीयत यः स वः ।
अव्याध्देतीश वज्रोऽसौ वदधीच्यस्थि संभवः ॥१४

विश्व संहृति शक्तिर्या विश्रुता बुद्धि रूपिणी ।
सा वः सौदर्शनी भूयात् गद प्रशमिनी गदा ॥१५

यात्यति क्षोद शालित्वं मुसलो येन तेन वः ।
हेतीश मुसलेनाशु भिध्यतां मोह मौसलम् ॥१६

शूलि दृष्ट मनोर्वाच्यो येन शूलयति द्विषः ।
भवतां तेन भवतात् त्रिशूलेन विशूलता ॥१७

अस्त्र ग्रामस्य कृत्स्नस्य प्रसूतिं यं प्रचक्षते ।
सोऽव्यात् सुदर्शनो विश्वम् आयुधैः षोडशायुधः ॥१८

श्रीमद् वेङ्कट नाथेन श्रेयसे भूयसे सताम् ।
कृतेयम् आयुधेन्द्रस्य षोडशायुध संस्तुतिः ॥१९

कवितार्किक सिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः